

षष्ठः पाठः

# ६ न गङ्गदत्तः पुनरेति कूपम्

यह पाठ सुप्रसिद्ध नीतिग्रन्थ *पञ्चतन्त्र* से उद्धृत है, जहाँ गङ्गदत्त नामक मेंढक की कथा के माध्यम से हमें विवेकपूर्ण जीवन जीने की शिक्षा मिलती है। इसका मुख्य संदेश यह है कि अपने स्वार्थ या प्रतिशोध के लिए दुर्जनों की सहायता लेना कभी भी हितकारी नहीं होता। अतः एक बुद्धिमान व्यक्ति अपनी पूर्व में की गई गलती को समझकर, गङ्गदत्त की तरह पुनः उस कुएँ में नहीं जाता है। इस नीति को अपनाते हुए वह फिर कभी उस सङ्कट में नहीं पड़ता।

This text is excerpted from the renowned book of fables, the *Panchatantra*, which imparts a vital lesson in wisdom and self-preservation through the story of a frog named Gangadatta. The narrative profoundly highlights how seeking the alliance of the wicked for personal revenge or temporary gain ultimately leads to one's own ruin. Consequently, it teaches that a truly wise person learns from past mistakes and resolves never to step back into a dangerous or toxic situation.

गङ्गाम् उभयतः विविधैः वृक्षैः सुशोभिताः ग्रामाः आसन्। तत्र एकस्मात् ग्रामात् बहिः वृक्षस्य अधः एकः जीर्णः कूपः आसीत्। तस्मिन् कूपे मण्डूकानाम् अधिपतिः गङ्गदत्तः परिजनैः सह निवसति स्म। सः गङ्गदत्तः परिश्रमं विनैव प्रभुत्वं प्राप्नोत्। अतः गर्वितः अभवत्।

तस्य दुर्व्यवहारेण केचित् प्रमुखाः भेकाः रुष्टाः जाताः। ते गङ्गदत्तम् अधिकारेण हीनं कृत्वा कूपात् बहिः कर्तुम् उद्यताः अभवन्। तद् ज्ञात्वा गङ्गदत्तः विषादम् अनुभवति स्म।

'शत्रूणां नाशः कथं भवेत्' इति एकान्ते चाटुकारैः सह मन्त्रणाम् अकरोत्। एकः नष्टबुद्धिः नाम मण्डूकः नत्वा अकथयत्–'नीतिं विना किमपि न सिध्यति। शत्रुः शत्रुणा नाशयितव्यः इति नीतिः। एषां शत्रूणां नाशाय सर्पः सहायकः भविष्यति। यः वृक्षस्य कोटरे निवसति। एवं सङ्घर्षं विनैव शत्रुनाशः भविष्यति।'

© NCERT not to be republished

ततः मूढः गङ्गदत्तः कूपात् बहिः आगत्य सर्पस्य समीपं गतः। सः सर्पं सादरम् उच्चैः अवदत् – 'नागराजाय नमः।'



विषधरः अवदत् – 'स्वागतं सखे! किं ते प्रियं करवाणि? किमर्थम् आगतः असि?' गङ्गदत्तः अवदत्–'त्वया सह मैत्रीं कर्तुं तव द्वारम् उपागतः।'

सर्पराजः तम् अपृच्छत्– 'भक्ष्यभक्षकयोः मध्ये कीदृशी मैत्री?' गङ्गदत्तः अकथयत् – 'सत्यम्, परम् अधुना अपमानितः अहं तव साहाय्यम् अभिलषामि।'

सर्पः – 'कस्मात् ते परिभवः?'
गङ्गदत्तः – 'स्वजनेभ्यः।'

सर्पः – 'क्व ते निवासः, वाप्यां, कूपे, तडागे वा?'
गङ्गदत्तः – 'कूपे। आगच्छ! मया सह, कूपस्य अन्तः प्रविश्य मम शत्रून् नाशय।'

ततः सर्पराजः तस्य वचनं स्वीकृत्य अकथयत् – 'अलं चिन्तया। अन्धः अस्मि ! मां कूपं नय।'

तदा तत्र गत्वा गङ्गदत्तः तस्मै प्रतिदिनम् एकैकं मण्डूकं भोजनाय प्रयच्छति स्म। क्रमशः सः सर्पः सर्वान् भेकान् भुक्त्वा अकथयत् – 'बुभुक्षितः अस्मि। प्रयच्छ मे अन्यद् भोजनम्।'

गङ्गदत्तः अवदत्–'मार्गं देहि येन बहिः गत्वा अन्यस्मात् जलाशयात् मण्डूकान् आनयामि।'



© NCERT not to be republished



ततः सर्पः तस्मै मार्गं दत्तवान्। गङ्गदत्तः बहिः आगत्य सोल्लासम् अवदत्– **न गङ्गदत्तः पुनरेति कूपम्।**

## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखत |
|---|---|---|---|---|
| उभयतः | पार्श्वयोः | दोनों ओर | On both sides | |
| बहिः | बाह्यभागे | बाहर | Outside | |
| अधः | निम्नभागे | नीचे | Below | |
| जीर्णः | पुरातनः<br>परित्यक्तः | पुराना | Old | |

© NCERT not to be republished

| | | | | |
|---|---|---|---|---|
| अधिपतिः | स्वामी | राजा | King | |
| परिजनैः | स्वजनैः | अपनों के साथ | With relatives | |
| गर्वितः | अहङ्कारी | घमण्डी | Arrogant | |
| रुष्टाः | क्रुद्धाः | नाराज | Angry | |
| कर्तुम् | विधातुम् | करने के लिए | To do | |
| उद्यताः | तत्पराः | तैयार | Ready | |
| ज्ञात्वा | अवगम्य विज्ञाय | जानकर | Having known | |
| विषादम् | खिन्नताम् | उदासी | Sorrow | |
| चाटुकारैः | स्तुतिपाठकैः | चापलूसी करने वालों के द्वारा | By flatterers | |
| मन्त्रणाम् | गुप्तपरामर्शम् | सलाह | Advice | |
| नत्वा | प्रणामं कृत्वा / प्रणम्य | नमस्कार करके | Having bowed down | |
| मूढः | मूर्खः / अज्ञानी | मूर्ख | Foolish | |
| उपागतः | समीपं प्राप्तः | समीप आया | Approached | |

© NCERT not to be republished

| | | | | |
|---|---|---|---|---|
| परिभवः | तिरस्कारः | अपमान | Disgrace | |
| वाप्याम् | दीर्घकूपिकायाम् | बावड़ी में | In the stepped-well | |
| अलम् | पर्याप्तम् / वृथा | व्यर्थ / बस | Enough | |
| सोल्लासम् | हर्षसहितम् / सहर्षम् | प्रसन्नतापूर्वक | Joyfully | |
| पुनरेति | पुनः गच्छति | वापस आता है | comes back | |
| भेकाः | मण्डूकाः | मेंढक | frog | |

© NCERT not to be republished

## अत्र इदम् अवधेयम्

**यथा— पठति इति क्रियापदस्य मूलं – 'पठ्' इति धातुः अस्ति।**

निवसन्ति – नि + वस्   भवन्ति – भू (भव्)   गच्छति – गम् (गच्छ्)

अवदत् – वद् (वद्)   अपृच्छत् – प्रच्छ् (पृच्छ्)

**ल्यप्-प्रत्ययः**

पाठे ज्ञात्वा, नत्वा, आगत्य, प्रविश्य इत्यादीनि पदानि प्रयुक्तानि सन्ति। एतानि पूर्वकालिकक्रियां बोधयन्ति।

**यथा**— ज्ञात्वा = जानकर / After knowing

क. नत्वा = प्रणाम करके / After saluting

ख. आगत्य = आकर / After coming

## वयम् अभ्यासं कुर्मः

**१. अधोलिखितानां प्रश्नानाम् एकपदेन उत्तरत—**

क. गङ्गाम् उभयतः के आसन्? ................................

ख. कूपे कः निवसति स्म? ................................

ग. गङ्गदत्तस्य दुर्व्यवहारेण के रुष्टाः अभवन्? ................................

घ. कूपात् बहिः आगत्य गङ्गदत्तः कस्य समीपं गतः? ................................

ङ. सर्वान् भेकान् कः अभक्षयत्? ................................

**२. रिक्तस्थानानि पूरयत—**

**(अ) पट्टिकातः** अव्ययपदानि चित्वा रिक्तस्थानानि पूरयत —

**विना, बहिः, प्रतिदिनम्, पुनः, क्व, ततः**

क. परिश्रमं ................ न सुखम्।

ख. सर्पः ................ पलायितः।

ग. छात्रः ................ विद्यालयं गच्छति।

घ. ................ ते निवासः?

ङ. वर्षाकाले ................ मा गच्छ।

च. गङ्गदत्त कुपम् न ................ एति।

© NCERT not to be republished

**(ब) कोष्ठकात् उचितं शब्दं चित्वा रिक्तस्थानानि पूरयत —**

| | | |
|---|---|---|
| क. | ..................... उभयतः वृक्षाः भवन्ति। | (मार्गम्, मार्गे, मार्गस्य) |
| ख. | वर्षाकाले ..................... बहिः गन्तुं न शक्यम्। | (गृहस्य, गृहात्, गृहे) |
| ग. | ..................... सह गमनं न युक्तम्। | (दुष्टेन, दुष्टस्य, दुष्टेभ्यः) |

**३. अधोलिखितानां परस्परं मेलनं कृत्वा रिक्तस्थानानि पूरयन्तु —**

**यथा—** सर्पः .......... विषधरः

| | | | |
|---|---|---|---|
| क. | मण्डूकः | जलाशयः | ..................................... |
| ख. | सखा | पराभवः | ..................................... |
| ग. | तडागः | भेकः | ..................................... |
| घ | अपमानः | क्रुद्धः | ..................................... |
| ङ. | रुष्टः | मित्रम् | ..................................... |



## क्रियाकलापः

**१. स्वस्य प्रियवस्तुनः मित्रस्य वा विषये पञ्चवाक्यानि लिखत —**

क. ..........................................................................................................

ख. ..........................................................................................................

ग. ..........................................................................................................

घ. ..........................................................................................................

ङ. ..........................................................................................................

**२. अधोलिखितं श्लोकं स्मृत्वा समवयस्कान् श्रावयत चर्चयत च —**

**बुभुक्षितः किं न करोति पापं, क्षीणजनाः निष्करुणा भवन्ति।**
**आख्याहि भद्रे प्रियदर्शनाय, न गङ्गदत्तः पुनरेति कूपम् ॥**

© NCERT not to be republished

**३. अस्मिन् पाठे यानि क्रियापदानि प्रयुक्तानि सन्ति, तानि रिक्तस्थानेषु लिखत—**

क. ..........................................................

ख. ..........................................................

ग. ..........................................................

घ. ..........................................................

ङ. ..........................................................

च. ..........................................................

छ. ..........................................................

ज. ..........................................................

© NCERT not to be republished